[This question paper contains 4 printed pages.]

**Sr. No. of Question Paper : 6361** **E** **Your Roll No................**

Unique Paper Code : 213201

Name of the Course : **B.A. (Hons.) Sanskrit**

Name of the Paper : (Paper IV) – Sanskrit Literature – II

Semester : II

Duration : 3 Hours Maximum Marks : 75

**Instructions for Candidates**

1. Write your Roll No. on the top immediately on receipt of this question paper.
2. **All** questions are compulsory.
3. Unless otherwise required in a question, answers should be written in Sanskrit or in Hindi or in English, but the same medium should be used throughout the paper.

**छात्रों के लिए निर्देश**

1. इस प्रश्न-पत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमांक लिखिए।
2. **सभी** प्रश्न अनिवार्य हैं।
3. अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत या हिन्दी या अंग्रेजी किसी एक भाषा में दीजिए, लेकिन सभी उत्तरों का माध्यम एक ही होना चाहिए।

1. प्रत्येक खण्ड से दो-दो पद्यों की सप्रसंग व्याख्या कीजिए : (6×4=24)

   Explain with context any **two** of the following from each section :

**खण्ड (क) / Part–A**

(i) व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूति ॥

(ii) शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने ॥

P.T.O.

(iii) क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो <u>भुवनेषु</u> रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ।।

(iv) स नन्दिनीस्तन्यनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः <u>शुभ्रं</u> यशो मूर्तमिवातितृष्णः ।।

## खण्ड (ख) / Part–B

(i) यस्यां यस्यामवस्थायां यत् <u>करोति</u> शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते <u>जन्मनि</u> जन्मनि ।।

(ii) रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ।
फलमूलाशिनां <u>राज्यं</u> स्वर्गः पर्णाशिनां तथा ।।

(iii) अधीत्य सर्ववेदान्वै सद्यो दुःखात्प्रमुच्यते ।
मानसं हि चरन्धर्मं स्वर्गलोकमवाप्नुयात् ।।

(iv) सर्दे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ।।

2. रघुवंश के द्वितीय सर्ग के आधार पर दिलीप का चरित्र चित्रण कीजिए । (10)

Sketch the character of Dilipa on the basis of second canto of Raghuvansham.

**अथवा / OR**

रघुवंश के द्वितीय सर्ग का सारांश लिखिए ।

Write summary of second canto of Raghuvansham.

3. निम्नलिखित में से किसी एक की संस्कृत में व्याख्या कीजिए : (6)

Explain any **one** of the following in Sanskrit :

(i) येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ।।

(ii) पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पंचदक्षिणः ।।

4. निम्नलिखित में से किन्हीं दो की व्याख्या कीजिए : (5×2=10)

Explain any **two** of the following :

(i) अशिशिरोपचारहार्योऽतितीव्रदर्पदाहज्वरोष्मा । सततममूलमन्त्रगम्यो विषमो विषयविषास्वादमोहः ।

(ii) अपगतमले हि मनसि स्फटिकमणाविव रजनीकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः ।

(iii) एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति ।

(iv) तदेवंप्रायातिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन्महान्धमोहकारिणि च यौवने कुमार! तथा प्रयतेथा यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः नोपालभ्यसे सुहृद्भिः ।

5. निम्नलिखित में से किन्हीं दो का अनुवाद कीजिए : (5×2=10)

Translate any **two** of the following :

(i) विदर्भो नाम जनपदः, तस्मिन्भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशीलः, शास्त्रप्रमाणकः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान् उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असंबद्धप्रलापेष्वदत्तकर्णः पुण्यश्लोकः पुण्यवर्मा नामाऽऽसीत् ।

(ii) स पुनरिमान्प्रत्याह – 'कोऽसौ मार्गः' इति । पुनरिमे ब्रुवते – "ननु चतस्रो राजविद्यास्त्रयी वार्तान्वीक्षिकी दण्डनीतिरिति । तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च तास्तावदासताम् । अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता! सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा" इति ।

(iii) किं बहुना । राज्यभारं भारक्षमेष्वन्तरङ्गेषु भक्तिमत्सु समर्प्य, अप्सरः प्रतिरूपाभिरन्तःपुरिकाभी रममाणो गीतसंगीतपानगोष्ठीश्च यथर्तुबध्नन् यथार्हं 'कुरु शरीरलाभम्' इति पंचाङ्गीस्पृष्टभूमिरञ्जलिचुम्बितचूडश्चिरमशेत् । प्राहसीच्च प्रतिफुल्ललोचनोऽन्तःपुरप्रमदाजनः ।

(iv) अरुचितेऽर्थे चोदयन्नर्थीवाक्षिगतोऽहमस्य हास्यो जातः । स्पृष्टमस्य चेष्टानामयथापूर्व्यम् । तथा हि न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनवस्तूनि प्रेषयति, न मत्सुकृतानि प्रगणयति, न गृहवार्ता पृच्छति, न मत्पक्ष्यान्प्रत्यवेक्षते, न मामासन्नकार्येष्वभ्यन्तरीकरोति, न मामन्तःपुरं प्रवेशयति ।

6. बाणभट्ट की शैली पर एक निबन्ध लिखिए । (10)

Write an essay on the style of Banabhatta.

**अथवा / OR**

विश्रुतचरित्र के आधार पर विहारभद्र की उक्ति का वर्णन कीजिए ।

Describe the saying of Viharbhadra on the basis of Vishrutcharita.

7. प्रश्न संख्या 1 एवं 5 के किन्हीं **पाँच** रेखांकित पदों पर व्याकरणात्मक टिप्पणी लिखिए । (5)

Write grammatical notes on any **five** of the underlined words in Question Nos. 1 & 5.